(यथा महाभारते ३ । २३२ । ४४ ।
"शतं दासीसहस्राणि कौन्तेयस्य महात्मनः ।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः" ॥)
शम्बूकः । हस्ती । इत्यमरः।३।३।१३३। मेदिनी च॥ कर्व्वूरवर्णः । ग्रीवा । वलयम् । इति हेमचन्द्रः । फाँपा हाड़ इति भाषा ॥

कम्बुका, स्त्री, (कम्बरिव कायति शोभते प्रकाशते वा । कै + कः टाप् च ।) अश्वगन्धावृक्षः । इति रत्नमाला । (गुणादयोऽस्या अश्वगन्धाशब्दे ज्ञेयाः ॥)

कम्बुकाष्ठा, स्त्री, (कम्बु चित्रवर्णं काष्ठं यस्याः ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥

कम्बुग्रीवा, स्त्री, (कम्बुवत् रेखात्रयशोभिता ग्रीवा ।) कम्ब्वाकृतिरेखात्रययुक्तग्रीवा। इत्यमरः।२।६।८८॥ (कम्बुः शङ्खस्तद्वत् रेखात्रययुक्ता ग्रीवा यस्येति विग्रहे वाच्यलिङ्गः । यथा महाभारते । १ । १५३ । १८ ।
"कम्बुग्रीवः पुष्कराक्षो भर्त्ता युक्तोभवेन्मम" ॥)

कम्बुपुष्पी, स्त्री, (कम्बुः शङ्खः तद्वत् शुक्लं पुष्पं यस्याः ।) शङ्खपुष्पीवृक्षः । इति राजनिर्घण्टः । (शङ्खपुष्पीशब्देऽस्या गुणा ज्ञातव्याः ॥)

कम्बुमालिनी, स्त्री, (कम्बुतुल्यपुष्पाणां माला समूहः अस्ति अस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥

कम्बोजः, पुं, (कम्ब + ओज ।) शङ्खविशेषः । देशभेदः । (यथा तन्त्रशास्त्रम् ।
"पञ्चनदं समारभ्य म्लेच्छाद्दक्षिणपूर्व्वतः ।
कम्बोजदेशो देवेशि ! वाजिराशिपरायणः" ॥)
हस्तिप्रभेदः । इति मेदिनी ॥ (तद्देशवासिनि त्रि॥)

कम्ब्वातायी, [न्] पुं, (कम्बुः शङ्खः स इव आतायी । शङ्खतुल्यशुक्लपूर्व्वकायत्वात्तथात्वम् ।) शङ्खचिल्लः । इति महाभारतम् ॥

कम्भारी, स्त्री, (कं जलं बिभर्त्ति धारयतीति । डु भृ धारणपोषणयोः + कर्म्मण्यण् + ङीप् गौरादित्वात् ङीष् वा ।) गम्भारीवृक्षः । इति शब्दमाला-राजनिर्घण्टौ । (गम्भारीशब्देऽस्या गुणादयो वक्तव्याः ॥)

कम्भु, स्त्री, (कं जलं तत्तुल्यं शैत्यं बिभर्त्ति । भृ + डुः ।) उशीरम् । इति राजनिर्घण्टः ॥

कम्रः, त्रि, (कामयतीति । कम् + नमिकम्पीति रः । ३ । २ । १६७ ।) कामुकः । मैथुनेच्छाविशिष्टः । इत्यमरः । ३ । १ । २४ ॥
(स्त्री, गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमनीयजला कम्रा कपर्द्दिसुकपर्द्दगा" ॥
जङ्घं प्रतीपं शान्तनुं कामितवती कम्रा कामुका ॥ इति तट्टीका । काम्यतेऽसौ इति ।)
कमनीयम् । यथा,—
"लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमामाशुमेन विवर्त्तिता वलिमता मध्येन कम्रस्तनी"। इति शाकुन्तले १ अङ्के ॥

कयस्था, स्त्री, (को वायुः स इव वेगेन याति अथवा कं जलं तस्य स्रोत इव याति । क + या + डः । तत्र तिष्ठति । स्था + कः टाप् च ।) वयस्था । इत्यमरटीकायां स्वामी ॥ काकोली इति ख्याता ॥

करः, पुं, (कं सुखं राति ददातीति । रा + कः ।) राजस्वम् । खाजाना इति पारस्यभाषा । तत्पर्य्यायः । भागधेयः २ बलिः ३ । इत्यमरः । २ । ८ । २७ ॥ कारः ४ । इति तट्टीका ॥ प्रत्यायः ५ । इति मेदिनी ॥ * ॥
अथ राज्ञां करग्रहणप्रकारः । क्रयविक्रयादिना लाभादीन् संप्रेक्ष्य राज्ञा करो ग्रहीतव्यः । यथा, मनुः । ७ । १२७-१३३ ।
"क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणां ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्" ॥*॥
राज्ञा राज्यात् वार्षिकः करोऽल्पाल्पं कृत्वा ग्रहीतव्यः । यथा,—
"यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः" ॥
मूलादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागरूपः करो ग्राह्यः । धान्यानां भूम्युत्कर्षापेक्षया कर्षणक्लेशलाघवगौरवापेक्षया च षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्रहीतव्यः । यथा,—
"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा" ॥*॥
द्रुमांसमधुसर्पिरादीनां षड्भागो लाभात् ग्रहणीयः । यथा,—
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानाञ्च चर्म्मणां वैदलस्य च ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च" ॥*॥
अतिक्षीणधनोऽपि राजा श्रोत्रियब्राह्मणात् करं न गृह्णीयात् । यथा,—
"म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्" ॥*॥
(कीर्य्यते विक्षिप्यतेऽसौ कर्म्मणि + अप् । हस्तकरिशुण्डयोस्तु करणेऽपि अप् ॥) वर्षोपलः । किरणः । (यथा रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत्" ॥)
हस्तः । (अमरः । ३ । ३ । १६३ ॥). हस्तिशुण्डः । इति मेदिनी ॥ (यथा, महाभारते ३ । ११ । २८ ।
"एवन्तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते ।
ऊरुं गजकराकारं करेणाभिजघान सः" ॥)
कर्म्मोपपदे कर्त्तृवाचकः । यथा । सुखकर इत्यादि॥ (यथा, रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत् ।
प्रतिलोमश्च ते वायुस्त्वत्पराभवलक्षणम्" ॥)

करकं, क्ली पुं, (किरति विक्षिपति जलं अस्मात् करोति जलमत्र वा । कृ + वा क "कृञादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) करङ्कः । कमण्डलुः । इति मेदिनी ॥ (यथा, मनुः । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च" ॥)

करकः, पुं, (करोति वाय्वादिजनितदोषाभावं कृणोति फलपत्रादिभिः वायुपित्तादिदोषं नाशयति वा कृण् हिंसायां "कृञादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) दाड़िमवृक्षः । राजकरः । पक्षिविशेषः । लट्टाकरञ्जवृक्षः । इति हेमचन्द्रः ॥ पलाशवृक्षः । इति हारावली ॥ कोविदारवृक्षः । वकुलवृक्षः । करीरवृक्षः । नारिकेलास्थि । इति राजनिर्घण्टः । माला इति भाषा ॥ (यथा, रामायणे ५ । १४ । ४८ ।
"हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि" ॥)

करकच्छपिका, स्त्री, (कच्छपस्येवाकृतिरस्त्यस्याः ठन् । करे स्थिता कच्छपिका कच्छपाकारमुद्रा ।) कूर्म्ममुद्रा । यथा,—कालिकापुराणे ५६ अध्यायः॥
"करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः" ॥

करकण्टकः, पुं, (करे हस्ते कण्टक इव ।) नखः । इति त्रिकाण्डशेषः ॥

करका, स्त्री पुं, (कृणोति हिनस्ति आम्रादिफलम् । "कृञादिभ्यो वुन्" । वुनन्तात् टापि क्षिपकादित्वात् प्रत्ययस्थादिति इत्वं न किरति क्षिपति जलं वा ।) मेघभवशिला । शिल इति भाषा । तत्पर्य्यायः । वर्षोपलः २ । इत्यमरः । १ । ३ । १२ ॥ मेघोपलः ३ । इति मेदिनी ॥ वीजोदकम् ४ घनकफः ५ मेघास्थि ६ वार्च्चरः ७ करः ८ करकः ९ । इति शब्दरत्नावली ॥ राधरङ्गुः १० धाराङ्कुरः ११ । इति जटाधरः ॥ मेदिन्यां राधरङ्ग इति पाठः ॥ (यथा मेघदूते ५६ ।
"तान्कुर्व्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्" ॥)

करकाम्भाः, [स्] पुं, (करकावत् शीतलं अम्भो जलं यत्र ।) नारिकेलवृक्षः । इति त्रिकाण्डशेषः॥

करग्रहः, पुं, (करः इयं मम भार्य्या इति प्रतिज्ञया गृह्यतेऽत्र वरेणेति यावत् । ग्रह + अधिकरणे अप् ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशती । ६०३ ।
"सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता ।
भणिता बहुमन्त्रविदा भवता काश्मीरमालेव" ॥)
करग्रहणञ्च ॥ (यथा, आर्य्यासप्तशती । ६२९ ।
"सकरग्रहं सवदितं
साक्षेपं सनखमुष्टि सजिगीषम्" ॥)

करग्रहारम्भः, पुं, (करग्रहस्य करादानस्य आरम्भः प्रशाम्भः ।) राज्ञां प्रजाभ्यो नववर्षीयकरस्य प्रथमादानम् । तद्दिनं पुण्याह इति ख्यातम् । तस्यापभाषा पुण्या । तस्य शुभदिननिरूपणम् यथा,—
"तीक्ष्णोग्रवर्ज्जितरभेषु लग्ने
शीर्षोदये भानुदिने शुभाहे ।
कुर्य्यादनुक्तानि समीहितानि
करग्रहारम्भमपि प्रशाम्भः" ॥
इति ज्योतिषम् ॥ अस्यार्थः । अश्लेषार्द्राज्येष्ठामूलापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदमघाभरणीकृत्तिकाभिन्ननक्षत्रेषु । मिथुनसिंहकन्यातुलावृश्चिककुम्भमीनलग्नेषु । रविसोमबुधवृहस्पतिशुक्रवारेषु करग्रहारम्भः कर्त्तव्यः ॥

करघर्षी, पुं, (कराभ्यां घृष्यतेऽसौ । कर + घृष् +